कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 95 विषय स्तोत्र
नाव. श्रीनृसिंहस्तवराज स्तोत्र
लेखक/लिपीकार —
पृष्ठ ५ काळ — पूर्ण/अपूर्ण

(1)

(44)

श्रीगणेशायनमः॥ अथसर्वसाधारणगायत्र्युपासकेन जप्त्वा॥ अन्यथा निष्फलंचैव इति रुद्रेण भाषितं॥
अथ न्यासः॥ अस्य श्रीगायत्रीमंत्रस्य॥ विश्वामित्रऋषिः शिरसि। यैंगायत्रीछंदः मुखे। सविता देवता हृदि। णिं बीजं गुह्ये। यंशक्तिः पादयोः। या कीलकं सर्वांगे। मम समस्तपापक्षयार्थं सकलकामनासिध्यर्थे जपे विं०॥
करसंपुटे॥ भूः पादाभ्यां०। भुवः हृदये। स्वः शिरसि॥ ॐ भूर्भुवःस्वरोंसर्वांगे॥ ॐ तत्सवितुः अंगु०। वरेण्यं तर्ज०। भर्गोदेवस्य मध्यमा०। धीमहि अना०। धियोयोनः क निष्ठि०। प्रचोदयात् करतल०। एवं हृदयादि॥ ततो अक्षरन्यासः॥ ॐ तत्काराय नमः पादयोः॥ ॐ स० गुल्फयोः।

वि·जंघयोः। लु·जान्वोः। ॐ र्व·ऊर्वोः॥ रे·गुदे। णि·लिंगे।
यं·कट्यां। भ·नाभौ। र्गो·उदरे। दे·स्तनयोः। वु·हृदये। स्य·कंठे।
धि·मुखे। म·तालुदेशे। हि·नासाग्रे। धि·नेत्रयोः। यो·भ्रूमध्ये।
यो·ललाटे। नः·पूर्वमुखे। प्र·दक्षिणमु·। चो·पश्चिममु·। द·
१
उत्तरमु·। या·मूर्ध्नि। ॐ तत्कार व्यंजने सर्वव्यापि ब्रह्मणे न
मः सर्वांगे न्यसेत्॥ ध्यानं॥ मुक्ताविद्रुमहेमनीलधवलछा
यैर्मुखैस्त्र्यक्षणैर्युक्तामिंदुकलानिबद्धमुकुटां तत्वार्थव
र्णात्मिकां॥ गायत्रीं वरदाभयांकुशकुशान्शुभ्रं कपालं गु
णं शंखं चक्रमथारविंदयुगुलं हस्तैर्वहंतीं भजे॥१॥ मुद्रा॥
१
सुमुखं संपुटं चैव विततं विस्तृतं तथा॥ द्विमुखं त्रिमुखं चैव
पंच
चतुः मुखं तथा॥ शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखं॥
प्रलंबं मुष्टिकं चैव मत्स्यः कूर्मो वराहकं॥ सिंहाक्रांतं महा

क्रांतं मुद्गरं पल्लवं तथा॥ चतुर्विंशतिमुद्राश्च गायत्र्यादौ प्र
दर्शयेत्॥ ततो शापविमोचनं पठेत्॥ ब्रह्मशापविमोचनमं
त्रस्य। निग्रहानुग्रह कर्ता प्रजापतिर्ऋषिः। ब्रह्मशापविमो
चनी गायत्री शक्तिर्देवता। कामदुघा गायत्री छंदः। ब्रह्मशाप
विमोचनार्थे जपे वि·॥ ॐ गायत्रीं भजामहे ग्निमुखीं विश्वगर्भां
यदुद्भवा देवाश्चक्रिरे विश्वसृष्टिं कल्याणीमिष्टकरीं प्रपद्ये
यन्मुखान्निःसृताखिललोकवेदगर्भः॥ ॐ सावित्रीं ब्रह्मोपा
सितं रूपं ब्रह्मविदो विदुस्तां पश्यंति धीराः सुमनसा वाचमास
न
त॥ ब्रह्मशापविमुक्ता भव॥ विश्वामित्रशापविमोचनमंत्र
स्य नूतनसृष्टिकर्ता विश्वामित्र ऋषिः भुक्तिमुक्तिप्रदाता वि
हा
श्वामित्रप्रदीप्ता गायत्री शक्तिर्देवता। वाग्दुघा गायत्री छंदः। वि
श्वामित्रशापविमोचने वि०॥ ॐ सावित्रीं भजामहे सुमुखीं वेदग

२

र्भों • वेदगर्भः। गायत्रीद्रोपासितं • मासत॥ विश्वामित्रशापवि • ॥२॥
वसिष्ठशापविमोचनमंत्रस्य। शापानुग्रहकर्ता वसिष्ठऋषिः। व
सिष्ठानुग्रहकर्त्री गायत्रीशक्तिर्देवता। वसिष्ठो ऽद्भवा गायत्रीछंदः।
वसिष्ठशापवि•॥ तस्तानीचांगेषु ग्निवतोधियांसः। ध्यायंतिविछो
रायुधानि विफलले पराकृतासोपरमुंचशाश्वतू। गायत्रीमासेदु
रमुंचमाधम॥ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो वि
ष्णुः प्रचोदयात्॥ अहोदेवि महादेवि दिव्यसंध्ये सरस्वति। अज
रे अमरेन्चैवब्रह्मयोनिनमोस्तुते॥ योनिमुद्रां प्रदर्श्य॥ ॐ ब्रह्म
ण्यशाश्वतेदेवि त्रिसंध्ये विष्णुसेविते। जगत्सवित्रेमुंचतेसवि
त्रेभास्वते नमः। वासिष्ठशापविमुक्ताभव॥ ततो त्रातास्क्षरं
गात्रीं पेसकृज्जपेत्॥ ॐ तत्स•। जातवेदसे•। त्र्यंबकं•॥ ततो
गायत्रीजपेत्॥ ॐ भू• तत्स• दृ ॐ•॥ यथासंख्यजस्वां तेगा

२

यत्र्यर्थः पठेत्॥ तत्। ईश्वरः सच्चिदानंदैकरसंपरंब्रह्मा
भिधीयते॥१॥ सवितुः जगतः प्रसवितुः॥२॥ वरेण्यं त्रिवि
धप आवरणीयं॥३॥ भर्गः ब्रह्मतेजः कर्मबीजान्यविद्या
दिदोषनिर्मूल संसारभर्जनात्॥४॥ देवस्य। दैदीप्यमान
स्य विज्ञानघनसच्चिदानंदात्मकं रूपं॥५॥ धीमहि ध्याये
म हिरण्मयपुरुषः सोहमिति चिंतयामः॥६॥ धियः बुधीः।
७॥ यः सविता सूर्यः॥८॥ नः अस्माकं श्रेयस्करेषु कर्म
सु॥९॥ प्रचोदयात् प्रेरयेदित्यर्थः॥१०॥ ततः उत्तरन्यासमु
द्राश्च कुर्यात्॥ सुरभिज्ञानहंसीच योनिः कूर्मोधपंकजं॥
लिंगंनिर्वाणमुद्राचजपांते द्वौ प्रदर्शयेत्॥१॥ इति गायत्री
जपविधिः॥

अथमालासंस्कारः॥ कुशोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य। ॐ ह्रीं अं आं इं ईं इत्यादिक्षकारांतानि मातृकाक्षराणि अश्वत्थपत्रस्थापितमालायां विन्यस्य सद्योजातमिति पंचमंत्रान्जपित्वा पित्वा। एतेषां मध्ये पंचगव्येन प्रथमेन शीतलजलेन मालां प्रक्षाल्य द्वितीयमंत्रेण चंदनादिना विघृष्य तृतीयेन धूपयित्वा चतुर्थेन चंदनकस्तूर्यादिनालेपयित्वा पंचमेन मंत्रेण प्रतिमणिशतं शतं अभिमंत्रयेत्॥ अघोरेभ्य इति मेरुं शतवारं अभिमंत्रयेत्। तत एतैरेव पंचमंत्रैः पंचोपचारैर्मालां इष्टदेवतावत्पूजयेत्। इति संस्कृतां मालां पात्रे निधाय प्रोक्ष्य। मां माले महामाये सर्वशक्तिसमन्विते। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भवेति प्रार्थ्य। ॐ अविघ्नं कुरु माले त्वमिति तामादाय मंत्रदेवतां ध्यायन्हृदयसमीपे धार्य मध्यमांगुलिमध्यपर्वे निधाय जपेत्। अंते प्रणवं उच्चार्य। त्वं माले सर्वदेवानां प्रीतिदा शुभदा

२

२

भव। शिवं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे॥ इति शिरसि मालां निधाय त्रिः प्राणानायम्य उत्तरन्यासं कृत्वा जपं गुह्येति मंत्रेण निवेद्य विसर्जयेत्॥ श्री कृष्णार्पणमस्तु॥
यत्र कर्मो जपं कृत्वा तां भूमिं प्रोक्ष्य वारिणा। तद्रेणु तिलकं कृत्वा तदनंत्याय कल्प्यते॥

॥श्रीगणेशाय नमः॥श्रीलक्ष्मीनृसिंहायनमः॥
श्रीगुरवेनमः। हरिःॐ अस्यश्रीनृसिंहस्तव
राजस्तोत्र